सदालङ्कृतां दृष्ट्वा मारकं माल्यानुलेपनांतु मस्तनीविशालां श्री
नानालंकारभूषितां॥४॥ लसंमितं बिबिबाद्यांबरां कुचासुशोभनां
हस्ताभ्यां मार्जनीं पूर्णं दधानां तन्नीकासरेतु॥५॥ मार्जन्या
मार्जितां स्फोटान् रोमांचयाश्रुदास्तु॥६॥ पूर्वकथा भसीक्षा
रूप[illegible]पतीमूर्ह मुहु[illegible]ध्यानं॥८॥ ॐ नमः सितलायनमः[illegible]न
मो सितलादेवीं रासभस्थां दिगंबरां॥१॥ मार्जनीकलसोपेतां[illegible]
कुंतमस्तकां॥५॥ स्कंदस्थां॥[illegible] भगवान् देवदेवैः सितलायै
नमः॥ वक्रमहं सितलेबे आविस्फोटकभयापहं॥५॥८॥ इच्छ-
मसुभं॥ वक्रमहं सितलेबे आविस्फोटकभयापहं॥५॥ [illegible] मा
रनवाः॥ वंदेहं सितलां देवीं सर्वरोगभयापहं॥५॥ [illegible] मा

दशहरा

॥ श्रीगणेशायनमः ॥ ॥ ॐ नमः श्रीगंगायै ॥ चतुर्भुजां त्रिनेत्रां च सर्वा
वयवसौभितां ॥ रत्नकुंभसितांभोजवरदाभयसत्करां ॥ १ ॥ पीतवस्त्र
परीधानां मुक्तामणिविभूषितां ॥ एवं ध्यायेत्सुसोम्यां च [illegible] च
च्युतसमप्रभां ॥ २ ॥ चामरैर्वीज्यमानां च श्वेतछत्रोपशोभितां ॥ सु
प्रसन्नां च वरदां करुणार्द्रनिरंतरां ॥ ३ ॥ सुधाप्लावितभूपृष्ठां दिव [illegible]

॥ १ ॥

गंधानुलेपनां ॥ त्रैलोक्यनमितांमंगां सर्वैर्देवैरधिष्ठितां ॥ ४ ॥ दिव्यरत्न
विभूषां च दिव्यमाल्यानुलेपनां ॥ ध्यात्वाजलेयथाप्रोक्तं तथा चीया
च पूजयेत् ॥ ५ ॥ ॐ नमो भगवति ऐं ह्रीं हिलि हिलि मिलि मिलि गं
गे मां पावय पावय स्वाहा ॥ ६ ॥ अनेन मंत्रेण गंगामोक्तेन पंचपुष्पां
जलीन् श्रीगंगायै निवेदयेत् ॥ मयाहृतानि पुष्पाणि पूजार्थं प्रति

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

गृह्यतां॥ दशांगं गुग्गुलं धूपं सुगंधं च मनोहरं॥८॥ मया हृतानि पुष्पाणि
गृहाण मंगलं दीपं घृतवर्त्तिसमन्वितं॥ रुद्ररूपेण नमस्तेस्तु गृहाण वरदा
भव॥९॥ परदारपरद्रव्यपरद्रोहपरांमुखः॥ गंगाम्भसि कदा गत्वा स्नाम
यं पावयिष्यति॥१०॥ इति श्रीविश्वानरनारदसंवादे दशपापहरायाश्री
गंगाया ध्यानार्चनं विधाय पश्चाज्जलांतरे स्थित्वा ज्येष्ठे मासि सितपक्षे

प्रतिपदादिदशमीपर्यंतं॥११॥ दशविधपापप्रनाशनार्थं प्रतिदिनमुत्त
रोत्तरं दिनवृध्यास्नात्रपाठमहं करिष्ये॥१२॥ ॥ब्रह्मोवाच॥ ॥नमः
शिवायै गंगायै शिवदायै नमो नमः॥ नमस्ते विष्णुरूपिण्यै ब्रह्ममूर्त्यै न
मोस्तुते॥१३॥ नमस्ते रुद्ररूपिण्यै शंकर्यै ते नमो नमः॥ सर्वदेवस्वरू
पिण्यै नमो भेषजमूर्त्तये॥१४॥ सर्वस्य सर्वव्याधीनां भिषक्श्रेष्ठे

नमोस्तुते॥स्थाष्णुजंजंगमसंभूतविग्रहंत्रैनमोनमः॥१५॥संसारदि
षनाशिन्यैजीवनायैनमोनमः॥तापत्रितयसंहृत्यैप्राणेशायैनमो
मः॥१६॥शांतिशंतानकारिण्यैनमस्तेशुद्धमूर्त्तये॥सर्वसंशुद्धिका
रिण्यैनमःपापादिमूर्त्तये॥१७॥भुक्तिमुक्तिप्रदायिन्यैभद्रदायैन
मोनमः॥भोगोपभोगदायिन्यैभोगवत्यैनमोस्तुते॥१८॥त्रिदुताशन

संस्थायैतेजोवत्यैनमोनमः॥मंदाकिन्यैनमस्तेस्तुस्वर्गदायैनमोनमः॥
॥१९॥नमस्त्रैलोक्यभूषायैत्रिपथायैनमोनमः॥नमस्तेशुक्लसंस्था
यैहृमावत्यैनमोनमः॥२०॥नंदायैलिंगधारिण्यैगायत्र्यैनमोस्तुते
॥नमस्तेविश्वमित्रायैरेवत्यैतेनमोस्तुते॥२१॥वृहत्यैतेनमस्तेस्तुलो
कधात्र्यैनमोनमः॥पृथ्वीशिवामृतायैवसुवृषायैनमोनमः॥२२॥

वरदायैनमोनमः॥उस्त्रायैसुखजग्ध्यैचसंजीविन्यैनमोनमः॥२४॥२
ब्रह्मिष्ठायै२
परापरशताढ्यायैतारायैतेनमोनमः॥पाशजालनिवृत्तिन्यैअभिनायै
नमोनमः॥२३॥शांतायैचवरिष्ठायैब्रह्मदायैदुरितघ्नैनमोस्तुते॥प्र
णतार्त्तिप्रभंजिन्यैजगन्मात्रेनमोनमः॥२५॥सर्वापत्प्रतिपक्षायैम
ंगलायैनमोनमः॥शरणागतदीनार्त्तपरित्राणपरायणे॥२६॥सर्वस्या
र्त्तिहरेदेविनारायणीनमोस्तुते॥निर्लेपायैदुर्गहंत्र्यैदक्षवत्यैनमो

नमः॥२७॥परापरपरेतुभ्यंनमस्तेमोक्षदेसदा॥गंगेममाग्रतोभूयाद्गंगे
मेतिष्ठपृष्ठतः॥२८॥गंगेमेपार्श्वयोरेधित्वयिगंगेऽस्तुमेस्थितिः॥आ
दौत्वमंतेमध्येचसर्वंत्वंगांगमेशिवे॥२९॥त्वमेवमूलप्रकृतिस्त्वंहि
नारायनयणःपरः॥गंगेत्वंपरमात्माचशिवस्तुभ्यंनमःशिवे॥३०॥य
इदंपठतेनित्यंस्तोत्रंभक्त्यानित्यंनरोत्तमः॥शृणोतुश्रद्धयायुक्तःका

यवाक्रितसंभवैः ॥३१॥ दशधासंस्थितैर्दोषैः सर्वैरेवप्रमुच्यते। रोगस्थो
मुमुच्यतेरोगादापद्भ्यश्चप्रमुच्यते ॥३२॥ द्विषद्भ्योबंधनाद्वेष्टेभ्य
श्चप्रमुच्यते। सर्वान्कामानमाप्नोतिप्रेत्यब्रह्मणिलीयते ॥३३॥ इ
मंस्तवंगृहेयस्तुलेखयित्वाविनिक्षिपेत्। नाग्निचौरभयंतत्रपापे
पिभयंनहि ॥३४॥ ज्येष्ठमासिसितेपक्षेदशमीहस्तसंयुता। संहरे

विधंपापंबुधेवारेणसंयुता ॥३५॥ तस्यांदशम्यामेतच्चस्तोत्रंगंगाजले
स्थितः ॥ यःपठेद्दशकृत्वस्तुदरिद्रोवापिचाक्रमः ३६ ॥ सोपितत्फल
माप्नोतिगंगांसंपूज्ययत्नतः ॥ पूर्वोक्तेनविधानेनयत्फलंसंप्रकीर्ति
तं ॥३७॥ यथागौरीतथागंगातस्माद्वैर्यास्तुपूजने ॥ विधिर्योविहित
सम्यक्सोपिगंगापूपूजनेयथाशिवस्तथाविष्णुर्यथाविष्णुस्तथा

हुमा॥उमायथातथागंगाचक्रुपंनभिद्यते॥३८॥विस्मुरुद्रोतरंयस्मद्ब
र्यीब्रूतेमूढधीस्तुसः॥४०॥रौरवादिसुघोरेषुनरकेषुपतत्यधः॥अद
त्तानामुपादानंहिंसाचैवाविधानतः॥४१॥परदारोपसेवाचकायिक
त्रिविधंस्मृतं॥पारुष्यमनृतंचैवपैशुन्यंचापिसर्वशः॥४२॥असंब
द्धप्रलापश्चवाङ्मयस्याचतुर्विधं॥परद्रव्येष्वभिध्यानंमनसानिष्ठचिं

तनं॥४३॥वितथाभिनिवेशश्चमानसंत्रिविधंस्मृतं॥एतानिदशपापा
निहरत्वंममजाह्नवि॥४४॥दशपापहरायस्मात्तस्माद्दशहरास्मृता॥
एतैर्दशविधैःपापैःकोटिजन्मसमुद्भवैः॥४५॥क्षणमुच्यतेनात्रसंदेहोब्र
ह्मणोवचनंयथा॥दशत्रिंशच्छतांत्सर्वान्पिहनथपितामहान्॥४६॥
उद्धरत्येवसंसारान्मंत्रेणानेनसृजिता॥नमोभगवत्येदशपापहरायै

येगंगायैनारायन्यैरेवत्यैवत्यैशिवायैदक्षायैअमृतायैविमुखायैता
रायैनंदिन्यैतेनमोनमः॥४७॥ज्येष्ठेमासिसितेपक्षेदशम्यांबुधहस्त
योः॥गारानंदाव्यतीपातेकन्याचंद्रेवृषेरवौ॥४८॥दशयोगेनरःस्ना
त्वासर्वपापैःप्रमुच्यते॥सितमकरनिषण्णांशुभ्रवर्णांत्रिनेत्रांकरध
तकलशोद्यत्सितोत्पलाभीत्यभीष्टां॥विधिहरिहररूपांसेंदुकोटी

रजूटांकलितसितदुकूलांजाह्नवींतांनमामि॥५०॥आदावादिपि
तामहस्यनियमव्यापारपात्रेजलं॥पश्चात्पन्नगशायिनोभगवतः
पादोदकंपावनंस्तुयशंशंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियं॥कन्या
कल्मषनाशिनीभगवतीभागीरथीदृश्यते॥५१॥इतिश्रीभवि
ष्योत्तरपुराणेकाशीमाहात्म्येदशहरास्तोत्रंसंपूर्णं॥श्री॥शुभंभवतु

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सा अनिव र्ते ते विस्फोटकभयं महत्॥१॥ सितले सीतले चेति यो बुद्धि
डीतः॥ विस्फोटकज्वरो दाहक्षिप्रं तस्य प्रशाम्यति॥ यस्य पुटकमध्ये
ज्वालापुते नशः॥ विस्फोटकभयं घोरं गृहे तस्य न जायते॥ सितले
दद्यात्स्यपुतिगंधामतस्यकः॥ प्रजापद्यक्षुषपुंसा रक्षा माहुर्जीवतेज
धं॥१॥ सीतले तनुजानुरोगानुन्मूलहरे शिशुस्य जानु॥ विस्फोटकेषु
सिद्धीनांहमेकाप्रवर्षिणी॥२॥ गलगंडाग्रहरोगाये यान्ये दारुणा
नृणां॥ कृदानुध्यानमात्रेण सितलेयांति संक्षयं॥ न मंत्रं नौषधं किंचि
न्नोपपरीक्षा
विद्यते॥ त्वमेकासितले धन्ये सिनान्यपरस्यां॥ देवतां॥३॥ कृपालो
तानुसादृशि नाम्नीह्यमध्यसंस्थीतांय स्त्रीसंयोतादे [illegible]